# Shri Mohiniraja Dhyanam

# श्री मोहिनीराज ध्यानम्

## Document Information

Text title : Mohiniraja DhyAnam 2

File name : mohinIrAjadhyAnam2.itx

Category : devii, vishhnu, devI, dhyAnam

Location : doc_devii

Transliterated by : Sachin Jahagirdar

Proofread by : Sachin Jahagirdar, NA

Acknowledge-Permission: Mohinirajakshetram, Nevasa, Ahmednagar

Latest update : October 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 20, 2022

*sanskritdocuments.org*

# श्री मोहिनीराज ध्यानम्

ध्यायेन्मोहिनिरूपिणीं भगवतीं सूर्याध्युतां गध्युतीं
दिव्यां भूषणभूषितां वरकरां पीताम्बरीं सुन्दरीम् ।
पीयूषां निजकुम्भहस्तकमलां नारायणी शोभनां
भक्तानां प्रवरातटे स्थितिकरां श्री इष्टदान्युत्सुकाम् ॥ १॥

उद्यत्भानुसहस्रदीपवपुषां जाम्बूनदालं कृतां
ब्रह्मेन्द्रादिसुरैः स्वमौलिमुनिभिर्नीराजनं श्रीपदाम् ।
भक्ताभीष्टफलप्रदाञ्च दधतीं हस्तैश्चतुर्भिर्घटं
शङ्ख चक्रमसिञ्च राहुमथिनीं ध्यायेत्सदा मोहिनीम् ॥ २॥

कान्ते कामिनि कालरात्रकमले कारुण्यपूर्णे कले
मायामोहिनिमङ्गले मधुहरे महालयै मान्त्रके ।
भर्गे भानि भवानि भक्ति सुरभिर्भाग्यै कलब्धेभये
वन्दे विश्वस्रजे विघन्तु दहरे वन्दे विधे वैष्णवीम् ॥ ३॥

कल्हारोत्पल कैरवाम्बुज दलन्माकन्दसन्मञ्जरी
कान्दण्डं करपङ्कजेन पधर्तीं पुण्ड्रेक्षुदण्डोद्भवम् ।
सौवर्णाङ्कुशपाशपाणि वरुणामारक्तवस्त्रावृतां
अम्बामम्बुजसन्निभां त्रिनयनां चन्द्रार्धचूडां भजेत् ॥ ४॥

लक्ष्मीशोभित वामभागममलां सिंहासने सुन्दरं
सव्यं चक्रधरं च निर्भयकरं वामेन चापुम्बरम् ।
सर्पाधीशकृतान्तपत्रममलां त्र्यक्षांविशष्टोज्वलं
वन्दे देवमुनीन्द्रवान्दिवपदं लक्ष्मीनृसिंहं भजेत् ॥ ५॥

असतविषमघ्नीं भावगम्यं प्रपन्नां
अमृतममरवर्योनासियत्सिन्धुमभ्यम् ।
कपटयुवतिवेशो मोहयंयः सुरारीं
तमहमुपश्रवानां कामपूरन्नतोस्मि ॥ ६॥

तप्तस्वर्णविभां शशाङ्कमुकुटां वन्दे चतुर्भिःकरैः
 बिभ्राणामसिपात्रशूलडमरून् श्रीम्हालसां शाम्भवीम् ।
भक्ताभीष्टकरां?बुजेन्द्रदिपरां श्रीखङ्गराजेश्वरीं
 गङ्गाराधिन पादुकां प्रणमतां दारिद्र्यविध्वंसिनीम् ॥ ७॥

शङ्खचक्रगदायुक्तां वामहस्ते कुकुपिकाम् ।
पादाभ्यां राहुदैत्यानां देवीं त्रैलोक्यमोहिनीम् ॥ ८॥

मोहिनि मोहनार्थाय मोहिनि मोहनाप्रिये ॥

मोहिनि तारणार्थाय मोहिनीराज ते नमः ॥ ९॥

महालये महादुर्गे महाघोरपराक्रमे ।
निवारये महादुःख पाहि मां करुणेश्वरि ॥ १०॥

क्षेत्रं वै निधिवास नाम कथितं तत्रैव देवः सदा
स्त्रीरूपं धृतवांस्दिवौकहिते लोकैः सदा पूज्यते ।
नेपथ्यं मुकुटञ्च भौतिकफलं भक्त्या सदा धार्यते
वामाङ्गे म्हालसा विभूषणयुता तस्मै नमो वैष्णवे ॥ ११॥

॥ इति मोहिनीराज ध्यानम् ॥

Devi Mahalasa is known as "Mohiniraj" in the ardhanArInaTeshvara form. The right half of the idol has masculine characterstics of Lord Vishnu. She is in all Her glorious incarnation as Mohini of the Samudra Manthan fame.

Encoded and proofread by Sachin Jahagirdar

*Shri Mohiniraja Dhyanam*

pdf was typeset on October 20, 2022

Please send corrections to *sanskrit@cheerful.com*